DRAWING BOO

Name U. V. Kaveri Bai

Class or Form II Form. A. Drawing

SRI RAMAKRISHNA MISSION HIGH SC

TYAGARAYANAGAR

Buddhacharita

Canto VI

ततो मुहूर्तेऽभ्युदिते जगच्चक्षुषि भास्करे । भार्गवस्याश्रमपदं स ददर्श नृणां वरः ॥

सुप्तविश्वस्तहरिणं स्वस्थस्थितविहंगमं । विश्रांत इव यद्दृष्ट्वा कृतार्थ इव चाभवत् ॥

स विस्मयनिवृत्त्यर्थं तपःपूजार्थमेव च । स्वां चानुवर्तितां रक्षन्नश्वपृष्ठादवातरत् ॥

अवतीर्य च पस्पर्श निस्तीर्णमिति वाजिनं । छंदकं चाब्रवीत्प्रीतः स्नापयन्निव चक्षुषा ॥

इमं तार्क्ष्योपमजवं तुरंगमनुगच्छता । दर्शिता सौम्य मद्भक्तिर्विक्रमश्चायमात्मनः ॥

सर्वथास्म्यन्यकार्योऽपि गृहीतो भवता हृदि । भर्तृस्नेहश्च यस्यायमीदृशः शक्त एव च ॥

अस्निग्धोऽपि समर्थोऽस्ति निःसामर्थ्योऽपि भक्तिमान् । भक्तिमांश्चैव शक्तश्च दुर्लभस्त्वद्विधो भुवि ॥

तत्प्रीतोऽस्मि तवानेन महाभागेन कर्मणा । दृश्यते मयि भावोऽयं फलेभ्योऽपि पराङ्मुखः ॥

को जनस्य फलस्थस्य न स्यादभिमुखो जनः । जनीभवति भूयिष्ठं स्वजनोऽपि विपर्यये ॥

कुलार्थं धार्यते पुत्रः पोषार्थं सेव्यते पिता । आशयाश्लिष्यति जगन्नास्ति निष्कारणा स्वता ॥

किमुक्त्वा बहु संक्षेपात्कृतं मे सुमहत्प्रियम् । निवर्तस्वाश्वमादाय संप्राप्तोऽस्मि प्रियं (ईप्सितं) वनम् ॥

इत्युक्त्वा स महाबाहुरनृशंसचिकीर्षया । भूषणान्यवमुच्यास्मै संतप्तमनसे ददौ ॥

मुकुटोद्दीप्तकर्माणं मणिमादाय भास्वरं । ब्रुवन् वाक्यमिदं तस्थौ सादित्य इव मंदरः ॥

अनेन मणिना छंद प्रणम्य बहुशो नृपः । विज्ञाप्योऽमुक्तविश्रंभं संतापविनिवृत्तये ॥

जरामरणनाशार्थं प्रविष्टोऽस्मि तपोवनं । न खलु स्वर्गतर्षेण नास्नेहेन न मन्युना ॥

तदेवमभिनिष्क्रांतं न मां शोचितुमर्हसि । भूत्वापि हि चिरं श्लेषः कालेन न भविष्यति ॥

ध्रुवो यस्माच्च विश्लेषस्तस्मान्मोक्षाय मे मतिः । विप्रयोगः कथं न स्याद्भूयोऽपि स्वजनादिभिः ॥

शोकत्यागाय निष्क्रांतं न मां शोचितुमर्हसि । शोकहेतुषु कामेषु सक्ताः शोच्यास्तु रागिणः ॥

अयं च किल पूर्वेषामस्माकं निश्चयः स्थिरः । इति दायाद्यभूतेन न शोच्योऽस्मि पथा व्रजन् ॥

भवंति ह्यर्थदायादाः पुरुषस्य विपर्यये। पृथिव्यां धर्मदायादा दुर्लभास्तु न संति वा॥
यदपि स्यादसमये यातो वनमसाविति। अकालो नास्ति धर्मस्य जीविते चञ्चले सति॥
तस्मादद्यैव मे श्रेयश्चेतव्यमिति निश्चयः। जीविते को हि विश्रंभो मृत्यौ प्रत्यर्थिनि स्थिते॥
एवमादि त्वया सौम्य विज्ञाप्यो वसुधाधिपः। प्रयतेथास्तथा चैव यथा मां न स्मरेदपि॥
अपि नैर्गुण्यमस्माकं वाच्यं नरपतौ त्वया। नैर्गुण्यात्त्यज्यते स्नेहः स्नेहत्यागान्न शोच्यते॥
इति वाक्यमिदं श्रुत्वा छंदः संतापविक्लवः। बाष्पग्रथितया वाचा प्रत्युवाच कृतांजलिः॥
अनेन तव भावेन बांधवायासदायिना। भर्तः सीदति मे चेतः नदीपंक इव द्विपः॥
कस्य नोत्पादयेद्बाष्पं निश्चयस्तेऽयमीदृशः। अयोमयेऽपि हृदये किं पुनः स्नेहविक्लवे॥
विमानशयनार्हं हि सौकुमार्यमिदं क्व च। खरदर्भांकुरवती तपोवनमही क्व च॥
श्रुत्वा तु व्यवसायं ते यदश्वोऽयं मया हृतः। बलात्कारेण तन्नाथ दैवेनैवास्मि कारितः॥
कथं ह्यात्मवशो जानन् व्यवसायमिमं तव। उपानयेयं तुरगं शोकं कपिलवस्तुनः॥
तन्नार्हसि महाबाहो विहातुं पुत्रलालसं। स्निग्धं वृद्धं च राजानं सद्धर्ममिव नास्तिकः॥
संवर्धनपरिश्रांतां द्वितीयां तां च मातरम्। देव नार्हसि विस्मर्तुं कृतघ्न इव सत्क्रियाम्॥
बालपुत्रां गुणवतीं कुलश्लाघ्यां पतिव्रताम्। देवीमर्हसि न त्यक्तुं क्लीबः प्राप्तामिव श्रियम्॥
पुत्रं याशोधरं श्लाघ्यं यशोधर्मभृतां वरः। बालमर्हसि न त्यक्तुं व्यसनीवोत्तमं यशः॥
अथ बंधुं च राज्यं च त्यक्तुमेव कृता मतिः। मां नार्हसि विभो त्यक्तुं त्वत्पादौ हि गतिर्मम॥
नास्मि यातुं पुरं शक्तो दह्यमानेन चेतसा। त्वामरण्ये परित्यज्य सुमित्र इव राघवम्॥
किं हि वक्ष्यति राजा मां त्वदृते नगरं गतं। वक्ष्याम्युचितदर्शित्वात्किं तवांतःपुराणि वा॥
यदप्यात्थापि नैर्गुण्यं वाच्यं नरपताविति। किं तद्वक्ष्याम्यभूतं ते निर्दोषस्य मुनेरिव॥
हृदयेन सलज्जेन जिह्वया सज्जमानया। अहं यद्यपि वा ब्रूयां कस्तच्छ्रद्धातुमर्हति॥
यो हि चंद्रमसस्तैक्ष्ण्यं कथयेच्छ्रद्दधीत वा। स दोषांस्तव दोषज्ञ कथयेच्छ्रद्दधीत वा॥

इति शोकाभिभूतस्य श्रुत्वा छंदस्य [illegible]
मद्वियोगं प्रति छंद संतापस्त्यज्यतामयम्। नानाभावो हि नियतं पृथग्जातिषु देहिषु॥
स्वजनं यद्यपि स्नेहान्न त्यजेयं मुमुक्षया। मृत्युरन्योन्यमवशानस्मान् संत्याजयिष्यति
महत्या तृष्णया दुःखैर्गर्भेणास्मि यया धृतः। तस्या निष्फलयत्नायाः क्वाहं मातुः क्व सा मम
वासवृक्षे समागम्य विगच्छंति यथांडजाः। नियतं विप्रयोगांतस्तथा भूतसमागमः॥
समेत्य च यथा भूयो व्यपयांति बलाहकाः। संयोगो विप्रयोगश्च तथा मे प्राणिनां मतः॥
यस्माद्याति च लोकोऽयं विप्रलभ्य परस्परम्। ममत्वं न क्षमं तस्मात्स्वप्नभूते समागमे॥
सहजेन वियुज्यंते पर्णरागेण पादपाः। अन्येनान्यस्य विश्लेषः किं पुनर्न भविष्यति
तदेवं सति संतापं मा कार्षीः सौम्य गम्यतां। लंबते यदि तु स्नेहो गत्वापि पुनराव्रज
ब्रूयाश्चास्मास्वनाक्षेपं जनं कपिलवस्तुनि। त्यज्यतां तद्गतः स्नेहः श्रूयतां चास्य निश्चयः
क्षिप्रमेष्यति वा कृत्वा जरामृत्युक्षयं किल। अकृतार्थो निरालंबो निधनं यास्यतीति वा
इति तस्य वचः श्रुत्वा कंथकस्तुरगोत्तमः। जिह्वया लिलिहे पादौ बाष्पमुष्णं मुमोच च
जालिना स्वस्तिकांकेन चक्रमध्येन पाणिना। आममर्श कुमारस्तं बभाषे च वयस्यवत्
मुंच कंथक मा बाष्पं दर्शितेयं सदश्वता। मृष्यतां सफलः शीघ्रं श्रमस्तेयं भविष्यति
मणित्सरुं छंदकहस्तसंस्थं ततः स धीरो निशितं गृहीत्वा कोषादसिं कांचनभक्तिचित्रं बिला-
दिवाशीविषमुद्बबर्ह॥
निष्कास्य तं चोत्पलपत्रनीलं चिच्छेद चित्रं मुकुटं सकेशं विकीर्यमाणांशुकमंतरिक्षे
चिक्षेप चैनं सरसीव हंसम्॥
पूजाभिलाषेण च बाहुमन्याद्दिवौकसस्तं जगृहुः प्रविद्धम्
यथावदेनं दिवि देवसंघा दिव्यैर्विशेषैर्महयां च चक्रुः॥

मुक्त्वा त्वलंकारकलत्रवत्तां श्रीविप्रवासं शिरसश्च कृत्वा।
दृष्ट्वांशुकं कांचनहंसचित्रं वन्यं स धीरोऽभिचकांक्ष वासः॥
ततो मृगव्याधवपुर्दिवौका भावं विदित्वास्य विशुद्धभावः।
काषायवस्त्रोऽभिययौ समीपं तं शाक्यराजप्रभवोऽभ्युवाच॥
शिवं च काषायमृषिध्वजस्ते न युज्यते हिंस्रमिदं धनुश्च।
तत्सौम्य यद्यस्ति न सक्तिरत्र मह्यं प्रयच्छेदमिदं गृहाण॥
व्याधोऽब्रवीत्कामद काममारादनेन विश्वास्य मृगान्निहन्मि।
अर्थस्तु शक्रोपम यद्यनेन हंत प्रतीच्छानय शुक्लमेतत्॥
परेण हर्षेण ततः स वन्यं जग्राह वासोंऽशुकमुत्ससर्ज।
व्याधस्तु दिव्यं वपुरेव बिभ्रत्तच्छुक्लमादाय दिवं जगाम॥
ततः कुमारश्च स चाश्वगोपस्तस्मिंस्तथा याति विसिस्मियाते
आरण्यके वाससि चैव भूयस्तस्मिन्नकार्ष्टां बहुमानमाशु॥
छंदं ततः साश्रुमुखं विसृज्य काषायसंविद्धृतकीर्तिभृत्सः।
येनाश्रमस्तेन ययौ महात्मा संध्याभ्रसंवीत इवोडुराजः॥
ततस्तथा भर्तरि राज्यनिःस्पृहे तपोवनं याति विवर्णवाससि
भुजौ समुत्क्षिप्य ततः स वाजिभृद्भृशं विचुक्रोश पपात च क्षितौ॥
विलोक्य भूयश्च रुरोद सस्वरं हयं भुजाभ्यामुपगृह्य कंथकं
ततो निराशो विलपन्मुहुर्मुहुः ययौ शरीरेण पुरं न चेतसा॥
क्वचित्प्रदध्यौ विललाप च क्वचित् क्वचित्प्रचस्खाल पपात च क्वचित्

ततो विसृज्याश्रुमुखं रुदंतं छंदं वनच्छंदतया निरास्थः
सर्वार्थसिद्धो वपुषाभिभूय तमाश्रमं सिद्धमिव प्रपेदे ॥
स राजसूनुर्मृगराजगामी मृगाजिरं तन्मृगवत्प्रविष्टः।
लक्ष्मीवियुक्तोऽपि शरीरलक्ष्म्या चक्षूंषि सर्वाश्रमिणां जहार॥
स्थिता हि हस्तस्थयुगास्तथैव कौतूहलाच्चक्रधराः सदाराः
तमिंद्रकल्पं ददृशुर्न जग्मुः धुर्या इवार्धावनतैः शिरोभिः॥
विप्राश्च गत्वा बहिरिध्महेतोः प्राप्ताः समित्पुष्पपवित्रहस्ताः
तपःप्रधानाः कृतबुद्धयोऽपि तं द्रष्टुमीयुर्न मठानभीयुः॥
हृष्टाश्च केकाः मुमुचुर्मयूरा दृष्ट्वांबुदं नीलमिवोन्नमंतम्
शष्पाणि हित्वाभिमुखाश्च तस्थुर्मृगाश्चलाक्षा मृगचारिणश्च॥
दृष्ट्वा तमिक्ष्वाकुकुलप्रदीपं ज्वलंतमुद्यंतमिवांशुमंतम्
कृतेऽपि दोहे जनितप्रमोदाः प्रसुस्रुवुर्होमदुहश्च गावः॥
कच्चिद्वसूनामयमष्टमः स्यात्स्यादश्विनोरन्यतरश्च्युतोऽत्र
उच्चेरुच्चैरिति तत्र वाचस्तद्दर्शनाद्विस्मयजा मुनीनाम्॥
लेखर्षभस्येव वपुर्द्वितीयं धामेव लोकस्य चराचरस्य
स द्योतयामास वनं हि कृत्स्नं यदृच्छयासूर्य इवावतीर्णः॥
ततः स तैराश्रमिभिर्यथावदभ्यर्चितश्चोपनिमंत्रितश्च
प्रत्यर्चयां धर्मभृतो बभूव स्वरेण भाद्रांबुधरोपमेन।

कीर्णं ततः पुण्यकृता जनेन स्वर्गाभिकामेन विमोक्षकामः
तमाश्रमं सोऽनुचचार धीरस्तपांसि चित्राणि निरीक्षमाणः ॥
तपोविकारांश्च निरीक्ष्य सौम्यस्तपोवने तत्र तपोधनानाम् ।
तपस्विनं कंचिदनुव्रजंतं तत्त्वं विजिज्ञासुरिदं बभाषे ॥
तत्पूर्वमद्याश्रमदर्शनं मे यस्मादिमं धर्मविधिं न जाने ।
तस्माद्भवानर्हति भाषितुं मे यो निश्चयो यं प्रति वः प्रवृत्तः ॥
ततो द्विजातिः स तपोविहारः शाक्यर्षभायर्षभविक्रमाय ।
क्रमेण तस्मै कथयाञ्चकार तपोविशेषं तपसः फलं च ॥
अग्राम्यमन्नं सलिलप्ररूढं पर्णानि तोयं फलमूलमेव ।
यथागमं वृत्तिरियं मुनीनां भिन्नास्तु ते ते तपसां विकल्पाः ॥
उंछेन जीवंति खगा इवान्ये तृणानि केचिन्मृगवच्चरंति ।
केचिद्भुजंगैः सह वर्तयंति वल्मीकभूता इव मारुतेन ॥
अश्मप्रयत्नार्जितवृत्तयोऽन्ये केचित्स्वदंतापहतान्नभक्षाः
कृत्वा परार्थं श्रपणं तथान्ये कुर्वंति कार्यं यदि शेषमस्ति ॥
केचिज्जलक्लिन्नजटाकलापाः द्विः पावकं जुह्वति मंत्रपूर्वम्
मीनैः समं केचिदपो विगाह्य वसंति कूर्मोल्लिखितैः शरीरैः ॥
एवंविधैः कालचितैस्तपोभिः परैर्दिवं यांत्यपरैर्नृलोकम्
दुःखेन मार्गेण सुखं क्षियंति दुःखं हि धर्मस्य वदंति मूलम् ॥
इत्येवमादि द्विपदेंद्रवत्सः श्रुत्वा वचस्तस्य तपोधनस्य

दुःखात्मकं नैकविधं तपश्च स्वर्गप्र...
लोकाश्च सर्वे परिणामवंतः स्वल्पे श्रमः खल्वयमाश्रमाणाम् ॥
प्रियं च बंधून् विषयांश्च हित्वा ये स्वर्गहेतौ नियमं चरंति।
ते विप्रयुक्ताः खलु गंतुकामाः महत्तरं स्वं वनमेव भूयः ॥
कायक्लमैर्यश्च तपोभिधानैः प्रवृत्तिमाकांक्षति कामहेतोः
संसारदोषानपरीक्षमाणो दुःखेन सोन्विच्छति दुःखमेव ॥
त्रासश्च नित्यं मरणात्प्रजानां यत्नेन चेच्छंति पुनःप्रसूतिम्
सत्यां प्रवृत्तौ नियतश्च मृत्युः तत्रैव मग्नो यत एव भीतः ॥
इहार्थमेके प्रविशंति खेदं स्वर्गार्थमन्ये श्रममाप्नुवंति।
सुखार्थमाशाकृपणोऽकृतार्थः पतत्यनर्थे खलु जीवलोकः ॥
न खल्वयं गर्हित एव यत्नो यो हीनमुत्सृज्य विशेषगामी
प्राज्ञैः समानेन परिश्रमेण कार्यं तु तद्यत्र पुनर्न कार्यम् ॥
शरीरपीडा तु यदीह धर्मः सुखं शरीरस्य भवत्यधर्मः
धर्मेण चाप्नोति सुखं परत्र तस्मादधर्मं फलतीह धर्मः ॥
यतः शरीरं मनसो वशेन प्रवर्तते वापि निवर्तते वा
युक्तो दमश्चेतस एव तस्माच्चित्तादृते काष्ठसमं शरीरम् ॥
आहारशुद्ध्या यदि पुण्यमिष्टं तस्मान्मृगाणामपि पुण्यमस्ति।
ये चापि बाह्याः पुरुषाः फलेभ्यो भाग्यापराधेन पराङ्मुखत्वात् ॥

दुःखेऽभिसंधिस्त्वथ पुण्यहेतुः सुखेऽपि कार्यो ननु सोऽभिसंधिः
अथ प्रमाणं न सुखेऽभिसंधिः दुःखे प्रमाणं ननु नाभिसंधिः ॥
तथैव ये कर्मविशुद्धिहेतोः स्पृशंत्यपस्तीर्थमिति प्रवृत्ताः ।
तत्रापि तोषो हृदि केवलोऽयं न पावयिष्यंति हि पापमापः ॥
स्पृष्टं हि यद्यद्गुणवद्भिरंभस्तत्तत्पृथिव्यां यदि तीर्थमिष्टम्
तस्माद्गुणानेव परैमि तीर्थमापस्तु निःसंशयमाप एव ॥
इति स्म तत्तद्बहु युक्तियुक्तं जगाद चास्तं च ययौ विवस्वान्
ततो हविर्धूमविवर्णवृक्षं तपःप्रशांतं स वनं विवेश ॥
अभ्युद्धृतप्रज्वलिताग्निहोत्रं कृताभिषेकर्षिजनावकीर्णम्
जाप्यस्वनाकूजितदेवकोष्ठं धर्मस्य कर्मांतमिव प्रवृत्तम् ॥
काश्चिन्निशास्तत्र निशाकराभः परीक्षमाणश्च तपांस्युवास ।
सर्वं परिक्षेप्य तपश्च मत्वा तस्मात्तपःक्षेत्रतलाज्जगाम ॥
अन्वव्रजन्नाश्रमिणस्ततस्तं तद्रूपमाहात्म्यगतैर्मनोभिः
देशादनार्यैरभिभूयमानान्महर्षयो धर्ममिवापयांतम् ॥
ततो जटावल्कलचीरखेलांस्तपोधनांश्चैव स तान् ददर्श
तपांसि चैषामनुबुध्यमानस्तस्थौ शिवे श्रीमति मार्गवृक्षे ॥
अथोपसृत्याश्रमवासिनस्तं मनुष्यवर्यं परिवार्य तस्थुः
वृद्धश्च तेषां बहुमानपूर्वं कलेन साम्ना गिरमित्युवाच ॥
त्वय्यागते पूर्ण इवाश्रमोऽभूत्संपद्यते शून्य इव प्रयाते ।

ब्रह्मर्षिराजर्षिसुरर्षिजुष्टः पुण्यः समीपे हिमवान्हि शैलः
तपांसि तान्येव तपोधनानां यत्संनिकर्षाद्बहुलीभवंति ॥
तीर्थानि पुण्यान्यभितस्तथैव सोपानभूतानि नभस्तलस्य
जुष्टानि धर्मात्मभिरात्मवद्भिर्देवर्षिभिश्चैव महर्षिभिश्च ॥
इतश्च भूयः क्षममुत्तरैव दिक्सेवितुं धर्मविशेषहेतोः
न हि क्षमं दक्षिणतो बुधेन पदं भवेदेकमपि प्रयातुम् ॥
तपोवनेऽस्मिन्नथ निष्क्रियो वा संकीर्णधर्मा पतितोऽशुचिर्वा
दृष्टस्त्वया येन न ते विवत्सा तद्ब्रूहि यावद्रुचितोऽस्तु वासः ॥
इमे हि वांछंति तपःसहायं तपोनिधानप्रतिमं भवंतम्
वासस्त्वया हीन्द्रसमेन सार्धं बृहस्पतेरभ्युदयावहः स्यात् ॥
इत्येवमुक्ते स तपस्विमध्ये तपस्विमुख्येन मनीषिमुख्यः
भवप्रणाशाय कृतप्रतिज्ञः स्वं भावमंतर्गतमाचचक्षे ॥
ऋज्वात्मनां धर्मभृतां मुनीनामिष्टातिथित्वात्स्वजनोपमानं
एवंविधैर्मां प्रति भावजातैः प्रीतिः परामा जनितश्च मार्गः ॥
स्निग्धाभिराभिर्हृदयंगमाभिः समासतः स्नात इवास्मि वाग्भिः
रतिश्च मे धर्मनवग्रहस्य विस्पंदिता संप्रति भूय एव ॥
एवं प्रवृत्तान्भवतः शरण्यानतीव संदर्शितपक्षपातान्
यास्यामि हित्वेति ममापि दुःखं यथैव बंधूंस्त्यजतस्तथैव ॥
स्वर्गाय युष्माकमयं तु धर्मो ममाभिलाषस्त्वपुनर्भवाय ।
अस्मिन्वने येन न मे विवत्सा भिन्नः प्रवृत्त्या हि निवृत्तिधर्मः ॥

तन्नारतिर्मे न परापचारो वनादितो येन परिव्रजामि
धर्मे स्थिताः पूर्वयुगानुरूपे सर्वे भवंतो हि महर्षिकल्पाः॥
ततो वचस्सूनृतमर्थवच्च सुश्लक्ष्णमोजस्वि च गर्वितं च।
श्रुत्वा कुमारस्य तपस्विनस्ते विशेषयुक्तं बहुमानमीयुः॥
कश्चिद्द्विजस्तत्र तु भस्मशायी प्रांशुः शिखी दारवचीरवासाः
आपिंगलाक्षस्तनुदीर्घघोणः कुंडोदहस्तो गिरमित्युवाच॥
धीमन्नुदारः खलु निश्चयस्ते यस्त्वं युवा जन्मनि दृष्टदोषः
स्वर्गापवर्गौ हि विचार्य सम्यक् यस्यापवर्गे मतिरस्ति सोऽस्ति॥
यज्ञैस्तपोभिर्नियमैश्च तैस्तैः स्वर्गं यियासंति हि रागवंतः
रागेण सार्धं रिपुणेव युद्ध्वा मोक्षं परीप्संति तु सत्त्ववंतः॥
तद्बुद्धिरेषा यदि निश्चिता ते तूर्णं भवान्गच्छतु विंध्यकोष्ठम्
असौ मुनिस्तत्र वसत्यराडो यो नैष्ठिके श्रेयसि लब्धचक्षुः॥
तस्माद्भवान् श्रोष्यति तत्त्वमार्गं सत्यां रुचौ संप्रतिपत्स्यते च
यथा तु पश्यामि मतिस्तथैषा तस्यापि यास्यत्यवधूय बुद्धिम्॥
पृष्ठोच्चघोणं विपुलायताक्षं ताम्राधरोष्ठं। सिततीक्ष्णदंष्ट्रं
इदं हि वक्त्रं तनुरक्तजिह्वं ज्ञेयार्णवं पास्यति कृत्स्नमेव॥
गंभीरता या भवतस्त्वगाधा या दीप्तता यानि च लक्षणानि
आचार्यकं प्राप्स्यति तत्पृथिव्यां यन्नर्षिभिः पूर्वयुगेऽप्यवाप्तम्
परममिति ततो नृपात्मजस्तमृषिजनं प्रतिनंद्य निर्ययौ
विधिवदनुविधाय तेऽपि तं प्रविविशुराश्रमिणस्तपोवनम्॥

— तपोवनप्रवेशो नाम सप्तमः सर्गः —

ततस्तुरंगावचरः स दुर्मनास्तथा वन भर्तार ।नमन गत
चकार यत्नं पथि शोकनिग्रहे तथापि चैवाश्रु न तस्य चिक्षिपे ॥
यमेकरात्रेण तु भर्तुराज्ञया जगाम मार्गं सह तेन वाजिना।
इयाय भर्तुर्विरहं विचिंतयंस्तमेव पंथानमहोभिरष्टभिः॥
हयश्च सौजस्वि चचार कंथकस्तताम भावेन बभूव निर्मदः।
अलंकृतश्चापि तथैव भूषणैरभूद्गतश्रीरिव तेन वर्जितः॥
निवृत्य चैवाभिमुखस्तपोवनं भृशं जिहेषे करुणं मुहुर्मुहुः।
क्षुधान्वितोऽप्यध्वनि शष्पमम्बु वा यथा पुरा नाभिननंद नाददे॥
ततो विहीनं कपिलाह्वयं पुरं महात्मना तेन जगद्धितात्मना।
क्रमेण तौ शून्यमिवोपजग्मतुर्दिवाकरेणेव विनाकृतं नभः॥
सपुण्डरीकैरपि शोभितं जलैः अलंकृतं पुष्पधरैर्नगैरपि
तदेव तस्योपवनं वनोपमं गतप्रहर्षैर्न रराज नागरैः॥
ततो भ्रमद्भिर्दिशि दीनमानसैः अनुज्वलैर्बाष्पहतेक्षणैर्नरैः।
निवार्यमाणाविव तावुभौ पुरं शनैरजः स्नातमिवाभिजग्मतुः॥
निशम्य च स्रस्तशरीरगामिनौ विनागतौ शाक्यकुलर्षभेण तौ
मुमोच बाष्पं पथि नागरो जनः पुरा रथे दाशरथेरिवागते॥
अथ ब्रुवंतः समुपेतमन्यवो जनाः पथि छंदकमागताश्रवः
क्व राजपुत्रः कुलराष्ट्रवर्धनो हृतस्त्वयासाविति पृष्ठतोन्वयुः॥

तत: स तान्भक्तिमतोब्रवीज्जनान्नरेंद्रपुत्रं न परित्यजाम्यहम्
रुदन्नहं तेन तु निर्जने वने गृहस्थवेशश्च विसर्जिताविति ।।
इदं वचस्तस्य निशम्य ते जना: सुदुष्करं खल्विति निश्चयं ययु:।
पतद्धि जह्रु: सलिलं न नेत्रजं मनो निनिंदुश्च फलोत्थमात्मन:।।
अथोचुरद्यैव विशाम तद्वनं गत: स यत्र द्विपराजविक्रम:।
जिजीविषा नास्ति हि तेन नो विना यथेंद्रियाणां विगमे शरीरिणां।।
इदं पुरं तेन विवर्जितं वनं वनं च तत्तेन समन्वितं पुरं।
न शोभते हि तेन हि नो विना पुरं मरुत्वता वृत्रवधे यथा दिवम्।।
पुन: कुमारो विनिवृत्त इत्यथो गवाक्षमाला: प्रतिपेदिरेंगना:।
विविक्तपृष्ठं च निशाम्य वाजिनं पुनर्गवाक्षाणि पिधाय चुक्रुशु:।।
प्रविष्टदीक्षस्तु सुतोपलब्धये व्रतेन शोकेन च खिन्नमानस:।
जजाप देवायतने नराधिपश्चकार तास्ताश्च यथाश्रया: क्रिया:।।
तत: स बाष्पप्रतिपूर्णलोचनस्तुरंगमादाय तुरंगमानस:
विवेश शोकाभिहतो नृपालयं क्षयं विनीते रिपुणेव भर्तरि।।
विगाहमानश्च नरेंद्रमंदिरं विलोकयन्नश्रुवहेन चक्षुषा
स्वरेण पुष्टेन रुराव कंथको जनाय दु:खं प्रतिवेदयन्निव।।
तत खगाश्च क्षयमध्यगोचरा: समीपबद्धास्तुरगाश्च सत्कृता:
हयस्य तस्य प्रतिसस्वनु: स्वनं नरेंद्रसूनोरुपयानशंकिता:।।
जनाश्च हर्षातिशयेन वंचिता: जनाधिपांत:पुरसंनिकर्षगा:

अत प्रहृषाद य शोकमूर्छता: कु [illegible]

गृहाद्विनिश्क्रमुराशया स्त्रिय: शरत्पयोदादिव विद्युतश्चला:।।

विलंबवेश्यो मलिनांशुकांबरा निरंजनैर्बाष्पहतेक्षणैर्मुखैः।

कृष्णा विवर्णांजनया विनाकृता दिवीव तारा रजनीक्षयारुणा:।

अरक्तताम्रैश्चरणैरनूपुरैरकुण्डलैरार्जवकार्णिकैर्मुखैः।

स्वभावपीनैर्जघनैरमेखलैरहारयोक्त्रैर्मुषितैरिव स्तनैः।।

निरीक्षिता बाष्पपरीतलोचनं निराश्रयं छंदकमश्वमेव च।

विवर्णवक्त्रा रुरुदुर्वरांगना वनांतरे गाव इवर्षभोज्झिता:।।

तत: सबाष्पा महिषी महीपते: प्रनष्टवत्सा महिषीव वत्सला

प्रगृह्य बाहू निपपात गौतमी विलोलपर्णा कदलीव कांचनी।।

हतत्विषोऽन्या: शिथिलांसबाहव: स्त्रियो विषादेन विचेतना इव

न चुक्रुशुर्नाश्रु जहुर्न शश्वसु: न चेतना उल्लिखिता इव स्थिता:।।

अधीरमन्या: पतिशोकमूर्छिता: विलोचनप्रस्रवणैर्मुखै: स्त्रिय:।

सिसिंचिरे प्रोषितचंदनान् स्तनान् धराधर: प्रस्रवणैरिवोपलान्।।

मुखैश्च तासां नयनांबुताडितैः ~~स्रवज्जलैः सोमरसैर्यथा सरः~~ [illegible]।

सुवृत्तपीनांगुलिभिर्निरंतरैः अभूषणैर्गूढशिरैरिवांगना:।।

उरांसि जघ्नु: कमलोपमैः करैः स्वपल्लवैर्वातचला लता इव।

करप्रहारप्रचलैश्च ता बभुर्यथापि नार्य: सहितोन्नतै: स्तनै:।।

नवाम्बुकालेऽम्बुदवृष्टिताडितैः स्रवज्जलैस्तामरसैर्यथा सरः।।

करप्रहारप्रचलैश्च ता बभुः यथापि नार्यः सहितोन्नतैः स्तनैः।
वनानिलाघूर्णितपद्मकंपितैः रथांगनाम्नां मिथुनैरिवापगाः॥
यथा च वक्षांसि करैरपीडयंस्तथैव वक्षोभिरपीडयन् करान्।
अकारयंस्ता परस्परं व्यथाः कराग्रवक्षोस्यबला दयालसाः॥
ततस्तु रोषप्रविरक्तलोचना विषादसंबंधकषायगद्गदम्
उवाच निःश्वासचलत्पयोधरा विगाढशोकाश्रुधरा यशोधरा॥
निशि प्रसुप्तामवशां विहाय मां गतः क्व स छंदक मन्मनोरथः।
उपागते च त्वयि कंथके च मे समं गतेषु त्रिषु कंपते मनः॥
अनार्यमस्निग्धममित्रकर्म मे नृशंस कृत्वा किमिहाद्य रोदिषि।
नियच्छ बाष्पं भव तुष्टमानसो न संवदत्यश्रु च तच्च कर्म ते॥
प्रियेण वश्येन हितेन साधुना त्वया सहायेन यथार्थकारिणा।
गतोऽर्यपुत्रो ह्यपुनर्निवृत्तये रमस्व दिष्ट्या सफलः श्रमस्तव॥
वरं मनुष्यस्य विचक्षणो रिपुर्न मित्रमप्राज्ञमयोगपेशलं।
सुहृद्ब्रुवेण ह्यविपश्चिता त्वया कृतः कुलस्यास्य महानुपप्लवः॥
इमा हि शोच्या व्यवमुक्तभूषणाः प्रसक्तबाष्पाविलरक्तलोचनाः।
स्थितेऽपि पत्यौ हिमवन्महीसमे प्रनष्टशोभा विधवा इव स्त्रियः॥
इमाश्च विक्षिप्तविटंकबाहवः प्रसक्तपारावतदीर्घनिःस्वनाः।
विनाकृतास्तेन सहैव रोधनैर्भृशं रुदंतीव विमानपंक्तयः॥
अनर्थकामोऽस्य जनस्य सर्वथा तुरंगमोऽपि ध्रुवमेष कंथकः।

[illegible]

गत: कशापातभयात कथं त्वयं श्रियं गृहीत्वा हृदयं च मे समं॥
अनार्यकर्मा भृशमद्य हेषते नरेंद्रधिष्ण्यं प्रतिपूरयन्निव
यदा तु निर्वाहयति स्म मे प्रियं तदा हि मूकस्तुरगाधमोऽभवत्।
यदि ह्यहेषिष्यत बोधयंजनं खुरैः क्षितौ वाप्यकरिष्यत ध्वनिं
हनुस्वनं वाजनिष्यदुत्तमं न चाभविष्यन्मम दुःखमीदृशम्॥
इतीह देव्याः परिदेविताश्रयं निशम्य बाष्पग्रथिताक्षरं वचः
अधोमुखः साश्रुकलः कृतांजलिः शनैरिदं छंदक उत्तरं जगौ॥
विगर्हितुं नार्हसि देव कंथकं न चापि रोषं मयि कर्तुमर्हसि
अनागसौ स्वः समवेहि सर्वशः गतो नृदेवः स हि देवि देववत्॥
अहं हि जानन्नपि राजशासनं बलात्कृतः कैरपि देवतैरिव॥
उपानयं तूर्णमिमं तुरंगमं तथान्वगच्छं विगतश्रमोऽध्वनि॥
व्रजन्नयं वाजिवरोऽपि नास्पृशन्महीं खुराग्रैर्विधृतैरिवांतरा
तथैव दैवादिव संयताननो हनुस्वनं नाकृत नाप्यहेषत॥
यदा बहिर्गच्छति पार्थिवात्मजस्तदाभवद्द्वारमपावृतं स्वयं।
तमश्च नैशं रविणेव पाटितं ततोऽपि दैवो विधिरेष गृह्यताम्॥
यदाप्रमत्तोऽपि नरेंद्रशासनाद्गृहे पुरे चैव सहस्रशो जनः॥
तदा स नाबुध्यत निद्रया हृतस्ततोऽपि दैवो विधिरेष गृह्यताम्॥
तदेवमावां नरदेवि दोषतो न तत्प्रयातं प्रतिगंतुमर्हसि
न कामकारो मम नास्य वाजिनः कृतानुयात्रः स हि दैवतैर्गतः॥

Kālidāsa would never use such expressions: निर्वाहयति in the sense of वाहयति and जगौ in the sense of उत्तरं जगाद

cf. न कामचारो मयि शंकनीयः - रघु

इति प्रयाणं बहुधैवमद्भुतं निशम्य तास्तस्य महात्मनः स्त्रियः
प्रनष्टशोका इव विस्मयं ययुर्मनोज्वरं प्रव्रजनात्तु लेभिरे ॥
विषादपारिप्लवलोचना ततः प्रनष्टपोता कुररीव दुःखिता
विहाय धैर्यं विरुराव गौतमी तताम चैवाश्रुमुखी जगाद च ॥
महोर्मिमंतो मृदवोऽसिताः शुभाः पृथक्पृथक् मूलरुहाः समुद्गताः ।
प्रवेरितास्ते भुवि तस्य मूर्धजा नरेंद्रमौलीपरिवेष्टनक्षमाः ॥
प्रलंबबाहुर्मृगराजविक्रमो महर्षभाक्षः कनकोज्वलद्युतिः
विशालवक्षा घनदुंदुभिस्वनस्तथाविधोऽप्याश्रमवासमर्हति ॥
अभागिनी नूनमियं वसुंधरा तमार्यकर्माणमनुत्तमं प्रति
गतस्ततोऽसौ गुणवान् हि तादृशो नृपः प्रजाभाग्यगुणैः प्रसूयते ॥
सुजातजालावततांगुली मृदू निगूढगुल्फौ विषपुष्पकोमलौ
वनांतभूमिं कठिनां कथं नु तौ सचक्रमध्यौ चरणौ गमिष्यतः ॥
विमानपृष्ठे शयनासनोचितं महार्हवस्त्रागुरुचंदनार्चितम्
कथं नु शितोष्णजलागमेषु तच्छरीरमोजस्वि वने भविष्यति ॥
कुलेन सत्त्वेन बलेन वर्चसा श्रुतेन लक्ष्म्या वयसा च गर्वितः
प्रदातुमेवाभ्युदितो न याचितुं कथं स भिक्षां परतश्चरिष्यति ॥
शुचौ शयित्वा शयने हिरण्मये प्रबोध्यमानो निशि तूर्यनिस्वनैः
कथं बत स्वप्स्यति सोऽद्य मे व्रती पटैकदेशांतरिते महीतले ॥
इमं विलापं करुणं निशम्य ता भुजैः परिष्वज्य परस्परं स्त्रियः
विलोचनेभ्यः सलिलानि तत्यजुः मधूनि पुष्पेभ्य इवेरिता लताः ॥

शनैश्च तत्तद्विलकाप विक्लवा मुहुर्मुहुर्गद्गद रुद्धया गिरा॥
स मामनाथां सह धर्मचारिणीं अपास्य धर्मं यदि कर्तुमिच्छति
कुतोऽस्य धर्मः सह धर्मचारिणीं विना तपो यः परिभोक्तुमिच्छति॥
शृणोति पूर्वं न स पूर्वपार्थिवान् महासुदर्शप्रभृतीन् पितामहान्।
वनानि पत्नीसहितानुपेयुष स्तथा स धर्मं मदृते चिकीर्षति॥
मखेषु वा वेदविधान संस्कृतौ न दंपती पश्यति दीक्षितावुभौ
समं मुमुक्षू परतोऽपि तत्फलं ततोऽस्य जातो मयि धर्ममत्सरः॥
ध्रुवं स जानन् मम धर्मवल्लभः मनः प्रियेप्याकलहं मुहुर्मिथः
सुखं विभीर्मामपहाय रोषणां महेन्द्रलोकेऽप्सरसो जिघृक्षति॥
इयं तु चिंता ममकीदृशां नु ता वपुर्गुणं बिभ्रति तत्र योषितः।
वने यदर्थं स तपांसि तप्यते श्रियं च हित्वा मम भक्तिमेव च॥
न खल्वियं स्वर्गसुखाय मे स्पृहा न तज्जनस्यात्मवतोऽपि दुर्लभं
स तु प्रियो मामिह वा परत्र वा कथं न जह्यादिति मे मनोरथः॥
अभागिनी यप्यहमायतेक्षणं शुचिस्मितं भर्तुरुदीक्षितं मुखं
न मंदभाग्योऽर्हति राहुलोऽप्ययं कदाचिदंके परिवर्तितुं पितुः॥
अहो नृशंसं सुकुमारवर्चसः सुदारुणं तस्य मनस्विनो मनः
कलप्रलापं द्विषतोऽपि हर्षणं शिशुं सुतं यस्त्यजतीदृशां स्वतः॥
ममापि कामं हृदयं सुदारुणं शिलामयं वाप्ययसापि वा कृतम्
अनाथवच्छ्रीरहिते सुखोचिते वनं गते भर्तरि यन्न दीर्यते॥

इतीह देवी पतिशोकमूर्छिता रुरोद दध्यौ विललाप चासकृत्
स्वभावधीरापि हि सा सती शुचा धृतिं न सस्मार चकार नो ह्रियम् ॥
ततस्तथा शोकविलापविक्लवां यशोधरां प्रेक्ष्य वसुंधरागताम्
महारविंदैरिव वृष्टिताडितैर्मुखैः सबाष्पैर्वनिता विचुक्रुशुः ॥
समाप्तजाप्यः कृतहोममंगलो नृपस्तु देवायतनाद्विनिर्ययौ
जनस्य तेनार्तरवेण चाहतः चचाल वज्रध्वनिनेव वारणः ॥
निशाम्य च च्छंदककंथकावुभौ सुतस्य संश्रुत्य च निश्चयं स्थिरम्
पपात शोकाभिहतो महीपतिः शचीपतेर्वृत्त इवोत्सवे ध्वजः ॥
ततो मुहूर्तं सुतशोकमोहितो जनेन तुल्याभिजनेन धारितः
निरीक्ष्य दृष्ट्या जलपूर्णया हयं महीतलस्थो विललाप पार्थिवः ॥
बहूनि कृत्वा समरे प्रियाणि मे महत्त्वया कंथक विप्रियं कृतम्
गुणप्रियो येन वने स मे प्रियः प्रियोऽपि सन्नप्रियवत् प्रवेरितः ॥
तदद्य मां वा नय तत्र यत्र स व्रज द्रुतं वा पुनरेवमानय
ऋते हि तस्मान्मम नास्ति जीवितं विगाढरोगस्य सदौषधादिव ॥
सुवर्णनिष्ठीविनि मृत्युना हृते सुदुष्करं यन्न ममार सृंजयः
अहं पुनर्धर्मरतौ सुते गते ऽमुमुक्षुरात्मानमनात्मवानिव ॥
विभोर्दशक्षत्रकृतः प्रजापतेः परापरज्ञस्य विवस्वदात्मनः
प्रियेण पुत्रेण सता विनाकृतं कथं न मुह्येद्धि मनो मनोरपि ॥
अजस्य राज्ञस्तनयाय धीमते नराधिपायेंद्रसखाय मे स्पृहा
गते वनं यस्तनये दिवं गतो न मोघबाष्पः कृपणं जिजीव ह ॥

प्रनष्टच मे मद्रतिदात्र ... हि ...

इमे परीप्संति हि ते पिपासवो ममासवः प्रेतगतिं यियासवः॥

इति तनयवियोगजातदुःखं क्षितिसदृशं सहजं विहाय धैर्यम्
दशरथ इव रामशोकवश्यो बहु विललाप नृपो विसंज्ञकल्पः॥

श्रुतविनयगुणान्वितस्ततस्तं मतिसचिवः प्रवयाः पुरोहितश्च
अवधृतमिदमूचतुर्यथावन्न च परितप्तमुखौ न चाप्यशोकौ॥

त्यज नरवर शोकमेहि धैर्यं कुधृतिरिवार्हसि धीर नाश्रु मोक्तुं
स्रजमिव मुदितामपास्य लक्ष्मीं भुवि बहवो हि नृपा वनान्यभीयुः॥

अपि च नियत एष तस्य भावः स्मर वचनं तदृषेः पुरासितस्य
न हि स दिवि न चक्रवर्तिराज्ये क्षणमपि वासयितुं सुखेन शक्यः॥

यदि तु नरवर कार्य एव यत्नस्त्वरितमुदाहर यावदत्र यावः
बहुविधमिह युद्धमस्तु तावत्तव तनयस्य विधेश्च तस्य तस्य॥

नरपतिरपि तौ शशास तस्माद्द्रुतमित एव युवामभिप्रयातम्
न हि मम हृदयं प्रयाति शांतिं वनशकुनेरिव पुत्रलालसस्य॥

परममिति नरेंद्रशासनात्तौ ययतुरमात्यपुरोहितौ वनं तत्
कृतमिति वधूजनः सदारो नृपतिरपि प्रचकार शेषकार्यम्॥ :

अंतःपुरविलापः अष्टमः सर्गः